# Shri Varadaraja Shatakam

# શ્રીવરદરાજશતકમ્

## Document Information

Text title : Varadaraja Shatakam

File name : varadarAjashatakam.itx

Category : vishhnu, shataka

Location : doc_vishhnu

Proofread by : Musiri Janakiraman

Description-comments : From stotrArNavaH 06-43

Latest update : July 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 30, 2021

*sanskritdocuments.org*

# શ્રીવરદરાજશતકમ્

કાઞ્ચ્યાં કાઞ્ચનરત્નશૈલશિખરે શુણ્ડાલશૈલાગ્રિમે
    દેશે લોકવિધાતૃધાતૃવિહિતે દેવોઽશ્વમેધે હરિઃ ।
પ્રાદુર્ભાવમુપાગતો વરદ ઇત્યાખ્યાં ગતશ્ચ ક્રિયા-
    દ્વાચં વારિધિભઙ્ગડમ્બરમુષં મોચાસમાનાં મમ ॥ ૧॥

યસ્યાઃ સદ્મ સરોરુહં સહ જનિશ્ચન્દ્રેણ યસ્યાઃ પયો-
    રશૌ યત્કરુણાવશાદ્વિધિરપિ ત્રૈલોક્યરાજ્યં ગતઃ ।
હૃત્પદ્મે મહસા કરોતુ કમલા વાસં ઘનાન્તર્ગતા
    વિદ્યુદ્વેતિ મતિં નૃણાં વિદધતી વક્ષઃસ્થલસ્થા વિભોઃ ॥ ૨॥

વન્દે શ્રિયઃપતિમુદારગુણૈરુપેતં
    વન્દારુલોકતરણાય વસુન્ધરાયામ્ ।
વાસીકૃતેભગિરિમધ્યતલં વિશુદ્ધ-
    વૈધાત્રવાજિમખવૈભવભાગધેયમ્ ॥ ૩॥

જ્યોત્સ્નાયમાનમૃદુહાસમુખેન્દુબિમ્બઃ
    કસ્તૂરિકાતિલકકાન્તલલાટમધ્યઃ ।
મુક્તાવિભૂષણવિરાજદુરાઃ સદાસ્માન્
    સંવીક્ષતાં વરદનામહરિઃ કટાક્ષૈઃ ॥ ૪॥

વાગ્વીચિમાલા મમ કૈટભારે
    વર્ષ્માંમ્બુધેસ્તે તનુતાં પ્રકાશમ્ ।
ગામ્ભીર્યકાન્ત્યાદિગુણૈરુપેતા
    સદ્વૃત્તરત્નશ્રિયમાદદાના ॥ ૫॥

લક્ષ્મીસહાયલલિતાઙ્ઘ્રિસરોજયુગ્મે
    વૃત્તિં કરોતુ મમ માનસમત્તભૃઙ્ગઃ ।
નિત્યં વિશુદ્ધભુવનસ્થિતસેવ્યગન્ધે
    સન્માર્દવે શ્રુતિશિરઃપરિચેયરૂપે ॥ ૬॥

દત્તાં મે દનુજારિપાદકમલં સર્વાઃ સદા સમ્પદઃ
  પુણ્યં પુણ્યજલાં મરન્દલહરીસમ્માનસમ્પાદિનીમ્ ।
ગઙ્ગાં શર્વશિરોવિભૂષણકરીમુત્પાદયદ્યોગિભિ-
  ર્ધ્યેયં ધ્યાનપરાયણૈઃ શ્રુતિશિરઃસંવેદનીયં સદા ॥ ૭॥

પદ્માકાન્તપદારવિન્દયુગલં સંશ્રિત્ય મન્માનસં
  બ્રહ્મેન્દ્રાદિસુરોત્તમાઙ્ગમકુટ પ્રોદ્ભાસિરત્નશ્રિયા ।
ચિત્રં તત્ર નિરન્તરં નિવસતિં કુર્યાત્તથા હ્યમ્બુજે
  લબ્ધે લુબ્ધમધુવ્રતઃ કિમપરં પુષ્પં શ્રયેન્નીરસમ્ ॥ ૮॥

નાનાર્થાવગમાય કૈટભરિપુર્મહ્યં સુધીદીપિકાં
  કૃત્સ્નેનાન્ધતમિસ્રનાશનચણાં દેયાદ્દયાવારિધિઃ ।
સૂર્યશ્ચેન્ન દદાતિ પઙ્કજચયોલ્લાસં શ્રિયં કોઽપરો
  દેયાન્મીલનહેતુકિલ્બિષચયપ્રધ્વંસિનીં પ્રાણભૃત્ ॥ ૯॥

વાક્કાર્મુકં વરદ મન્મથમલ્લિકાદિ
  પુષ્પાયુધોદ્વહનકાર્મુકવન્મદીયમ્ ।
ત્વત્પાદપદ્મયુગલં મુનિવૃન્દવન્દ્યં
  શુદ્ધૈરલં પરિકરોતુ સુવૃત્તરત્નૈઃ ॥ ૧૦॥

પદ્માકાન્તપદારવિન્દનખરૈર્નિર્ધૂતદોષોદયૈ-
  રક્ષીણદ્યુતિભિઃ કલઙ્કરહિતૈસ્તારાધિપો નિર્જિતઃ ।
ભીત્યા તિગ્મકરે કદાચિદુદધૌ શૈલે ચ મહ્યન્તરે
  સ ભ્રાન્તો વિચરન્ હ્રિયા પરિવૃતઃ શઙ્કામહે લીયતે ॥ ૧૧॥

એતત્કિં કમલં ન તજ્જલવૃતં કિં વા પ્રવાલં ન તત્
  કાઠિન્યં વહતે પરં તુ સતતં શાખાગ્રસંશોભિતમ્ ।
મન્યે પલ્લવમિત્યલં મુનિગણાઃ પદ્માપ્રિયાઙ્ઘ્રિદ્વયં
  નિષ્ણાતું ન હિ શક્નુવન્તિ તરસા સાક્ષાત્કૃતં સમ્ભ્રમાત્ ॥ ૧૨॥

પદ્માનાયકપાદભાવમુરરીકૃત્યામ્બુજં ચન્દ્રમઃ-
  પાદૌઘેન પરાહતં નખમિષાન્મન્યે નિરુન્ધે વિધુમ્ ।
ચન્દ્રત્વે તુ ખવર્જનાન્નખપદં યુક્તં નખાનાં તથા
  પાદામ્ભોજયુગે પુનર્ભવપદં યુક્તં પુનસ્સમ્ભવાત્ ॥ ૧૩॥

શાખાગ્રેષુ કૃતં સ્થિતિં સુમનસાં વૃન્દેન નિત્યોચ્છ્રિતં

સદ્રાગં પદપલ્લવં મધુરિપુસ્વર્ભૂરુહસ્યાદરાત્ ।
ચેતોભૃઙ્ગ મમામૃતાત્મકફલં ભક્ત્તાય સા ત્કુર્વતો
નિત્યં સંશ્રયતાં ભવાન્ કુતુકવાન્ પ્રાપ્નોતિ તસ્માત્સુખમ્ ॥ ૧૪॥

નિર્વાણં નિતરાં ન કિં વિતનુતે સ્વીયેન ગન્ધેન તે
પદ્માકાન્તપદદ્વયં ન તનુતે મોદં શ્રિતાલેઃ કિમુ ।
નાદત્તે કિમુ હંસકશ્રિયમહો કેનારવિન્દાભિધં
ન સ્યાત્તદ્વિધિસંશ્રિતં ભવતિ ચેદેતચ્ચ કા વા ભિદા ॥ ૧૫॥

પદ્માકાન્તપદારવિન્દનખરઃ કિં વા ન વીક્ષ્યઃ પદે
વાસં યાતિ ન કિં કલાપરિવૃતશ્ચન્દ્રઃ કુતો નો ભવેત્ ।
પદ્મશ્રીપરિભાવિપાદનિલયઃ ચન્દ્રો યદિ શ્રીપતેઃ
પાદદ્વન્દ્વનખોઽપિ ભેદકમતઃ કિં વાનયોર્વર્તતે ॥ ૧૬॥

ત્વત્પાદાબ્જનખૈર્મધુપ્રમથન શ્રીસમ્પદા નિર્જિતઃ
ચન્દ્રો જેતુમશક્નુવન્ પુનરમૂનેતચ્ચિતાઙ્ઘ્રિપ્રભમ્ ।
પદ્મં રશ્મિવિતાનકેન તનુતે તેજઃપહીણં જનાઃ
કુર્વન્તિ દ્વિષતા હતાઃ પ્રતિકૃતિં તત્સઙ્ગતે દુર્બલે ॥ ૧૭॥

કુપ્યત્કાલિયભોગિભોગફલકે રત્નાભિરામે હરે-
ર્નાટ્યં ભૂષણનિસ્વનૈઃ સુરુચિરં યત્પાદપદ્મં દધૌ ।
તન્મે મઙ્ગલમાતનોતુ સતતં હૃત્પદ્મનિષ્ઠં સદા
યદ્ધ્યાત્વા વિબુધાઃ પ્રયાન્તિ સકલશ્રેયઃપદં શાશ્વતમ્ ॥ ૧૮॥

યત્પાદપદ્મરજસા મહિલાત્વમાપ
પાષાણતામુપગતાપિ મુનીન્દ્રપત્ની ।
યત્સમ્ભવા સ્રગિવ મૂર્ધ્નિ હરસ્ય રેજે
ગઙ્ગા મદીયહૃદયે કુરુતાં સ્થિતિં તત્ ॥ ૧૯॥

નાગાન્તકસ્ય કરપલ્લવઘટ્ટનેન
સઞ્જાતરાગમિવ ભાસુરમન્તરઙ્ગે ।
વૃત્તિં કરોતુ મમ સન્તતમઙ્ઘ્રિપદ્મં
લોકૈકરક્ષણપરસ્ય રમાપ્રિયસ્ય ॥ ૨૦॥

પુરન્દરપરાજય-પ્રભવસર્વસમ્પચ્ચયં
બલેરપિ મનઃક્લમં મઘવતઃ શ્રિયશ્ચેશિતુઃ ।
પરત્વ-વિચિકિત્સયા પશુપતિ-પ્રભુત્વભ્રમં

પરાકુરુત યત્ક્રમે પદયુગં હરેસ્તદ્ભજે ॥ ૨૧॥

પ્રચણ્ડકરમણ્ડલપ્રસૃતરત્નજાલાચિત-
સ્ફુરદ્રુચિરનૂપુરચ્છવિભિરમ્બરં છાદયત્ ।
વિજૃમ્ભિતતમોનુદદ્વિજવૃન્દવન્દ્યં સદા
વિભાતુ હૃદયે પદદ્વયમધીશિતુઃ શ્રીહ્રિયોઃ ॥ ૨૨॥

કમણ્ડલુજલૈર્વિભોઃ કલુષદારિભિઃ ક્ષાલિતં
કુરઙ્ગમદકુઙ્કુમપ્રચુરચન્દનાવાસિતૈઃ ।
વિચિત્રવરભૂષણૈર્વિવિધકાન્તિરત્નોજ્જ્વલૈઃ
વિભૂષિતમુપાસ્મહે વિબુધવન્દ્યવિષ્ણોઃ પદમ્ ॥ ૨૩॥

કપર્દિ શિરસસ્તટં કપિલહુઙ્કૃતિધ્વંસિતાન્
શતક્રતુહતક્રતોરપિ રિરક્ષિષાપ્રોત્સુકાન્ ।
હયસ્ય પદવીં ગતાન્ હતમહત્તમાન્ સાગરાન્
પવિત્રયતિ યજ્જલં હૃદિ વિભાસતાં તત્પદમ્ ॥ ૨૪॥

ભવત્પદભવન્નખૈર્નિભૃતકાન્તિપૂરૈર્હરે
સમીભવિતુમુદ્યતે શશિનિ રોષિતૈસ્તે નખૈઃ ।
ભવત્પદભવદ્ધુનીચલજલે સ્વયં બિમ્બિતૈઃ
સૃજદ્ભિરપરાન્ વિધૂન્ વિધુરકારિ પઙ્કાઙ્કિતઃ ॥ ૨૫॥

શ્રુતિપ્રચયઘોષિતે ગગનતો મહત્ત્વે હરે-
રસમ્ભવમતર્કયન્ જગતિ જન્તવઃ કેચન ।
ત્રિવિક્રમપદાક્રમાદ્ગગનદભ્રભાવે સ્ફુટે
જયધ્વજપટીકૃતા હરિપદચ્યુતા જાહ્નવી ॥ ૨૬॥

ક્ષિતિં ચ બલિમસ્તકં ખમપિ વિક્ષિપંસ્ત્રિક્રમૈઃ
ક્રમેણ પદયોહરિર્જયતિ પૂર્વમધ્યોત્તરૈઃ ।
ન દેશસમયૈઃ કૃતોઽવધિરપિ વ્યવસ્થાં શ્રુતે-
રસમ્ભવવિશઙ્કિનાં જગતિ કર્મણા સ્પષ્ટયન્ ॥ ૨૭॥

મણિપ્રવરચિત્રિતૈર્વરવિભૂષણૈર્ભૂષિતં
ત્રિવિક્રમપદદ્વયં ધ્વજરથાઙ્ગવજ્રાઙ્કુશૈઃ ।
સરોજમુખલાઞ્છનૈરપિ પરત્વવિદ્યોતનૈ-
રલઙ્કૃતમુપેયુષો મમ વિરાજતાં મસ્તકે ॥ ૨૮॥

શ્રુતિપ્રચયદૂરગં શ્રમવિદારણં ભૂતલે
    પ્રસાર્ય સરમઃ પુમાંશ્ચરણમમ્બરે ચાપરમ્ ।
પ્રસન્નનખચન્દ્રિકાતતિભિરન્ધકારં નુદન્
    પ્રપન્નજનતાહૃદાં જયતિ વર્ધયન્ સ્વં વપુઃ ॥ ૨૯॥

ત્રિવિક્રમનખક્ષપાકરકરાલિવિધ્વંસિતે
    જગત્રિતયસદ્મનાં મલિનચક્ષુષાં પાતકે ।
અનાદિમિલદંહસાં જગતિ માદૃશાં પાતક-
    પ્રમાર્જનપટીયતે હરિપદચ્યુતા જાહ્નવી ॥ ૩૦॥

ત્રિવિક્રમપદોન્નતેરપઘનો નૃણાં માનસે-
    ષ્વતુલ્યકલુષાદ્રિષુ પ્રતિવિજૃમ્ભિતેષ્વમ્બરે ।
હરેઃ કુલિશમાદિશત્ કલુષશૈલભેદાર્થમિ-
    ત્યવૈમિ વિચલજ્જલાં હરિપદચ્યુતાં જાહ્નવીમ્ ॥ ૩૧॥

ત્રિવિક્રમપરાક્રમાત્ તિમિરવૃન્દવિધ્વંસનાત્
    નખચ્છવિભિરદ્રિરાડ્ રજતરૂપતામભ્યગાત્ ।
સુમેરુરપિ હંસકચ્છવિભિરાપ સૌવર્ણતાં
    પયોધિરપિ નીલતાં પદયુગસ્ય ભાસાધ્યગાત્ ॥ ૩૨॥

ત્રિવિક્રમપદેઽમ્બરે વિલસતિ સ્વભાસા સુરા
    જગત્ત્રયતમોઽપહે હરિમથાર્થયન્ સન્નતાઃ ।
સદા તિમિરનુત્તયે સ ચ રમાપતિર્હંસક-
    પ્રભાભિરકરોદ્રવિં નખરરશ્મિલેશૈર્વિધુમ્ ॥ ૩૩॥

વટચ્છદપુટે શિશોઃ શયિતુરઙ્ઘ્રિપઙ્કેરુહં
    મુખાબ્જવિનિવેશિતં મધુરસૌધનિષ્યન્દનમ્ ।
યુગાન્તતરણિપ્રભાપ્રસરદગ્ધદેહાત્મનાં
    રસેન સુખદં ભજે શુભશરીરસંવર્તિનામ્ ॥ ૩૪॥

ભજજ્જનમનઃસ્થિતઃ સુહરિતત્ત્વસંસ્ફોરણા-
    દજસ્રપરિપીડિતો હરિપદં હિ રાગઃ શ્રયન્ ।
વિજૃમ્ભણમુપેયિવાન્ વિજયતે વિરોધં સ્મરન્
    વટચ્છદપુટસ્થિતં સુહરિતત્ત્વમેવ શ્રિયા ॥ ૩૫॥

હિરણ્યકશિપુપ્રભૃત્યસુરમુખ્યસમ્પીડિતાઃ
    વિમોહપરિધૂમિત-પ્રચુરશોકવહ્ન્યર્દિતાઃ ।

સુરા અપિ યદાશ્રયાન્નખસુધાંશુસન્ધુક્ષિતાઃ
    સ્વધામનિ સુનિર્વૃતા હરિપદં તદાશાસ્મહે ॥ ૩૬॥

આક્રાન્તં ભુવનં મયેતિ વિબુધા ગન્ધેન વૈ નિર્વૃતાઃ
    સેવ્યે પુણ્યકૃતાં શિરોભિરતુલં રૂપં મમાસ્તીતિ ચ ।
મા કાર્ષીરરવિન્દ ગર્વમધિકં રાજત્સતાં મૌલિભિઃ
    પદ્માનાયકપાદપદ્મમનઘં ત્વત્તોઽધિકં વર્તતે ॥ ૩૭॥

નિત્યં વિષ્ણુપદાશ્રિતાઃ કુવલયં સંરોચયન્તઃ કલા-
    સન્દોહેન નિરસ્તપઙ્કજગણાઃ સદ્ભિઃ સદા સંશ્રિતાઃ ।
આહ્લાદં સતતં નૃણાં વિદધતઃ કે વા ન કુર્યસ્તમો-
    ભેદં શીતલરશ્મિવત્ સુમનસઃ સત્ત્વાભિવૃદ્ધિપ્રદાઃ ॥ ૩૮॥

ચતુર્મુખપદોદ્ધતૈ-શ્ચલિતવજિહૃત્પઙ્કજૈઃ
    સુમાલિમુખરાક્ષસૈઃ સુમથિતં સુરાણાં બલમ્ ।
ચતુર્મુખશિવાદિષુ પ્રબલભીતિષુ પ્રેક્ષિતું
    સુવર્ણકરપઙ્કજસ્થિતપદત્વરા રક્ષતિ ॥ ૩૯॥

સુવર્ણકમલાકરે સુબહુદિવ્યરત્નાકરે
    સુનીલઘનડમ્બરે હરિવપુઃસુધામ્ભોનિધૌ ।
સમુત્થિતપદામ્બુજં સકલલોકસમ્મોહનં
    સદાવતુ ધરાશ્રિયોર્લલિતહસ્તસંવાહિતમ્ ॥ ૪૦॥

ફણીન્દ્રશયને ફણામણિવિચિત્રકાન્ત્યુજ્જ્વલે
    કુશેશયમૃદુત્વચિ ક્લમપરીમુષઃ સઙ્ગમાત્ ।
પદામ્બુજયુગસ્ય તે કટકધારિહસ્તાબ્જયા
    સુલોહિતમભૂત્ કિલા કિમુ મુકુન્દ સંવાહનાત્ ॥ ૪૧॥

સુવર્ણકનકાદ્રિરાડુપરિનીલમેઘાયિત-
    સ્તદીયકરપઙ્કજદ્વયવિષક્તપાદામ્બુજઃ ।
સરોવરજવોચ્છલન્મકરદષ્ટદન્તાવલં
    રરક્ષ યદુપક્રમાન્નરકહાવતાત્તત્પદમ્ ॥ ૪૨॥

પ્રપન્નજનગોમૃતાવ્રતમથ પ્રભોર્મૂલતાં
    પ્રસિદ્ધકરુણં ચ તં દ્વિરદપુઙ્ગવં યત્ત્વરા ।
જુગોપ જગદન્તરા વિતતચન્દ્રસચ્ચન્દ્રિકા-
    વિશુદ્ધયશસઃ શ્રિયં હરિપદં તદાભાતુ નઃ ॥ ૪૩॥

ગુણાધિકકૃપાસખી ભગવતસ્ત્વરા રક્ષિતું
    સમસ્તજગદાલયાન્ ભગવદઙ્ઘ્રિપઙ્કેરુહમ્ ।
પ્રયાપયતિ તત્કૃપાવશસમીરિતાન્માનસાન્
    પુરઃ સ્વયમુપાર્જિતું ભુવનરક્ષણોદ્યદ્યશઃ ॥ ૪૪॥

મહાયવનસેનયા મરુદધીશસેનાદ્રુહો
    નિરુદ્ધતલગોપુરે યદુકુલોદ્વહાનાં પુરે ।
મહાભયમપાકરોદ્યવનમુખ્યજાતં ત્વરા
    મુકુન્દપદગોચરા સુમુચુકુન્દમુક્તિપ્રદા ॥ ૪૫॥

સ્ફુરત્ફણિવરાકુલં પ્રબલશક્રનક્રાકુલં
    સુરેન્દ્રબલસાગરં ક્ષુભિતમુત્કટં કુર્વતઃ ।
હિરણ્યકશિપોરુરઃસ્થલવિદારણપ્રોચ્ચલ-
    ત્પ્રભૂતરુધિરોક્ષિતાઃ કરનખા હરેર્ભાન્તુ નઃ ॥ ૪૬॥

સન્માર્ગસ્ખલનપ્રધાનકરણૈઃ સ્વીયૈર્જલૈઃ પઙ્કિલં
    કુર્વન્તો ભુવનં વિચેરુરનિશં યત્રૈવ રક્ષોધનાઃ ।
તત્રૈવોદયમાસસાદ સમયે રામાઙ્ઘ્રિપઙ્કેરહં
    ચિત્રં પ્રાપ પુરઃ શ્રિયં ચ ભુવનં નિષ્પઙ્કમત્યાતનોત્ ॥ ૪૭॥

દમ્ભોલિઃ કલુષાદ્રિષુ શ્રિતવતાં હૃત્પઙ્કજેષ્વર્યમા
    રક્ષોવૃન્દતમોવિદારણવિધૌ સાક્ષાજ્જ્વલન્ પાવકઃ ।
કૌસલ્યાદિદૃગુત્પલોત્સવવિધૌ ચન્દ્રશ્ચયઃ સ્યાત્ સ્વયં
    રામસ્યાઙ્ઘ્રિસરોરુહસ્થનખરો મન્માનસે સર્વદા ॥ ૪૮॥

કૌસલ્યોદરસર્વસમ્ભવરમાનેત્રોત્પલશ્રીકલ-
    શ્રીમત્સુન્દરરામચન્દ્રચરણશ્ચઞ્ચૂર્યતાં માનસે ।
યન્નેત્રૈસ્તૃષિતૈઃ પિબન્તિ મુનયઃ સન્તપ્તદેહાઃ પુરા
    દુર્વારત્રયનવાદિદુઃસહમહાતાપૈશ્ચકોરા ઇવ ॥ ૪૯॥

ચિત્રં રામકરાભિમૃષ્ટમનિશં ભાતિ શ્રિયા સ્વોદયા-
    દુષ્ણાંશોઃ કુલમુત્પુનાતિ ભુવને રામાઙ્ઘ્રિપઙ્કેરુહમ્ ।
નિત્યં પુણ્યજનોત્તમાઙ્ગમહિતં નિષ્પાદયત્યદ્ભુતં
    લોકં પુણ્યજનપ્રહીણમમલૈર્જન્મધ્રુગપ્યર્ચ્યતે ॥ ૫૦॥

રક્ષોભિઃ ખરદૂષણપ્રભૃતિભિર્નેતું જગદૂષિતં

રક્ષંલ્લક્ષ્મણપૂજિતાઙ્ઘ્રિકમલો યાત્રાં હિ યત્રાકરોત્ ।
રામસ્તત્ર તદીયપાદકમલસ્પર્શાત્ સુરેન્દ્રાદિભિઃ
દુષ્પ્રાપં પદમાપ વૃક્ષલતિકાગુલ્માદિ સર્વં જગત્ ॥ ૫૧॥

તમઃપ્રકૃતિષુ સ્ફુરત્સુરવધૂમુખામ્ભોરુહ-
સ્થિતાધરસુધાશિષુ દ્વિજવરાશિષુ સ્વદ્રુહઃ ।
(યદા)નનવિધુન્તુદેષ્વસહનં ગતશ્ચન્દ્રમા
રઘૂદ્વહપદોલ્લસન્નખશરત્વમેત્યાક્ષિપત્ ॥ ૫૨॥

પાદઃ પુનાતુ રઘુવંશસમુદ્રજાત
શ્રીરામચન્દ્ર ભવતો મમ મસ્તકાગ્રમ્ ।
ક્ષિપ્તાનિ યેન ભુવનસ્થિતપઙ્કજાનિ
યેનૈવ તત્કુવલયં ભજતિ પ્રકાશમ્ ॥ ૫૩॥

ક્ષિપ્તો વેદપથઃ ક્ષમાક્ષયબલૈઃ ક્ષેમક્ષયાત્ક્ષોભિતા
ક્ષીણાઃ ક્ષોણિભૃતઃ ક્ષરત્ક્ષતજયુક્ક્ષેત્રાઃ ક્ષિતોત્ક્ષેપિતાઃ ।
ઇત્થં ક્ષોણિતલં ક્ષપાચરગણૈઃ ક્ષિપ્તં ક્ષણાત્ પ્રાપિતં
ક્ષેમં લક્ષ્મણપૂજ્યલક્ષણભૃતા લક્ષ્મીપ્રિયાઙ્ઘ્રિશ્રિયા ॥ ૫૪॥

કિરીટનિક્ષિપ્તમણિપ્રકાશ-
નીરાજિતં પાદસરોજયુગ્મમ્ ।
રામસ્થ સેવે રઘુપુઙ્ગવસ્ય
બ્રહ્મેન્દ્રરુદ્રાદિસુરેશ્વરાણામ્ ॥ ૫૫॥

પાયાત્ પોષિતરાજહંસનિચયે ભૂભૃત્પ્રભોર્માનસે
નિત્યં જાતબલાપવારણકરે સઞ્જીવનત્યાગિનિ ।
સ્વોત્પત્ત્યા વિદધત્પ્રસાદમતુલં રામાઙ્ઘ્રિપઙ્કેરુહં
પઙ્કચ્છેદિ શિરોભિરુત્તમજનૈઃ સંસેવ્યમાનં સદા ॥ ૫૬॥

સરયૂપવને વરયૂપમયે ચરતઃ પરિતઃ સમયા રમયા ।
કલયે વલયાભરણૌ ચરણૌ સુનખાવનઘૌ મનસા શિરસા ॥ ૫૭॥

હૃદયે સદયે નિદધે વિદધ-
ચ્ચરણે શરણે નિરતં વિરતમ્ ।
કરુણાવરુણાવસથઃ સપથઃ
પ્રભુવં પ્રભવો જગતઃ સ્વગતં (?) ॥ ૫૮॥

જમ્ભારિમર્દનવિમર્દિતદિવ્યદેહા
    બર્હિર્મુખા યુધિ દિશો દશ વિદ્રવન્તઃ ।
ભાનોઃ કુલે ભગવતઃ પદપદ્મયુગ્મં
    ધ્યાત્વાભવન્ સુમનસઃ સુમહારિનાશાત્ ॥ ૫૯॥

મારીચાદિસુરારિવૃન્દનિધનવ્યાજેન ભૂમણ્ડલં
    સઞ્ચારેણ પદારવિન્દયુગલં યદ્રાઘવસ્યાપુનાત્ ।
વિશ્વામિત્રમુનીન્દ્રયજ્ઞતપસાં સિદ્ધિશ્ચ યદ્દર્શનાત્
    તન્નિઃશ્રેયસમાતનોતુ મુનિભિઃ સમ્પૂજ્યમાનં સદા ॥ ૬૦॥

ચરણૌ શરણાગતપ્રિયઃ
    કરુણાવારિધિરબ્જલોચનઃ ।
વરુણાલયપાણિમર્દિતા-
    વરુણામ્ભોજનિભૌ દદાતુ મે ॥ ૬૧॥

જઙ્ઘે જગત્રિતયવિક્રમજાઙ્ઘિકત્વે
    હેતૂ મધુપ્રમથનસ્ય મનોજ્ઞરૂપે ।
નીલાશ્મનિર્મિતમનોજ્ઞગદાસરૂપે
    માલિન્યખણ્ડનપરે ભવતાં મનઃસ્થે ॥ ૬૨॥

લક્ષ્મીનાયકજાનુની ભુજયુગાયામાવધી મામકે
    ભાસેતાં હૃદયે કરામ્બુજયુગસ્પર્શેન રોમાઞ્ચિતે ।
ઉત્સઙ્ગોપરિ સુન્દરે વિનિહિતે સંવાહનાર્થં શ્રિયા
    રત્નાદર્શસભાનરૂપસહિતે સત્કાન્તિપૂરાવૃતે ॥ ૬૩॥

કુમ્ભીન્દ્રહસ્તકદલીકરભેન્દ્રનીલ-
    સ્તમ્ભાભિભૂતિચતુરૌ ગુણવૈભવેન ।
ઊરૂ રમાપ્રણયિનઃ કમનીયશોભૌ
    નિત્યં મદીયહૃદયે કુરુતાં નિવાસમ્ ॥ ૬૪॥

મેઘઃ કિમેષ ચપલાનિચયેન યુક્તઃ
    સિન્ધુઃ કિમેષ બડબામુખવહ્નિયુક્તઃ ।
ઇત્થં સદામરગણા હિ વિચિન્તયન્તિ
    પીતામ્બરેણ સહિતં હરિમીક્ષમાણાઃ ॥ ૬૫॥

લલ્મીકાન્તકટીતટીનવમણિશ્રેણીસમુલ્લાસિત-
    સ્વચ્છસ્વર્ણમયપ્રભાકરકરશ્રીચોરસન્મેખલા ।

વર્ણોત્કૃષ્ટસુતપ્તહાટકપટીસચ્છાદિતા માનસે
નિત્યં ભાતુ તદન્તરાલનિવસદ્ધ્વાન્તચ્છટાપાટિકા ॥ ૬૬॥

યસ્માત્તોયરુહાદ્વિધિસ્ત્રિજગતામીશઃ પ્રભૂતઃ પુરા
યસ્મિન્નીલસરોજપત્રસદૃશં વ્યોમ દ્વિરેફાકૃતિમ્ ।
ગત્વારાજત તચ્ચ યત્ર સરસિ પ્રાદુર્બભૂવામ્બુજં
નાભૌ તદ્ગુણસંહતેર્વિવરણે દેવો ન શક્તો વિધિઃ ॥ ૬૭॥

શ્રીવત્સં દનુજાર્દનસ્ય રુચિરે વક્ષઃસ્થલે સંશ્રિતં
શ્રીર્વત્સં કિમુ જાનતી કરુણયા તત્સન્નિધૌ વર્તતે ।
યદ્વા ક્ષીરપયોનિધાવુદયનાત્ સૌન્દર્યબુદ્ધ્યા શુભં
હૃદ્યં કૌસ્તુભનામકં મણિવરં દ્રષ્ટું કિમત્રાગતા ॥ ૬૮॥

લક્ષ્મીકટાક્ષા મધુમર્દનોરઃસ્થલે વિરાજન્તિ સદા ભ્રમન્તઃ ।
ષડઙ્ઘ્રયઃ શ્રીતુલસીસુગન્ધમત્રાગતા લેઢુમિવ પ્રવૃદ્ધમ્ ॥ ૬૯॥

મધુદ્વિષદુરઃસ્થલે મૃદુલરત્નસિંહાસને
મનોભવતનોરપિ શ્રિયમુપેયુષિ શ્રેયસિ ।
ચરાચરવિચારણક્રમમુપેયુષા શ્રેયસા
કટાક્ષવિસરેણ નોઽવતિ રમેક્ષમાણા સ્થિતા ॥ ૭૦॥

સર્વાભીષ્ટફલપ્રદાનચતુરે ભૂભર્તૃભાવોજ્જ્વલે
નિત્યં ભાવવિવર્ધને ઘનરસાશ્લેષે પ્રિયે મારુતૈઃ ।
નિત્યં વૃદ્ધિમુપાગતે નિવસતિં લબ્ધાવતાદ્રૂપિણી
વિદ્યુદ્વિષ્ણુપદાશ્રયાદ્વિલસતી જન્મ શ્રિતાવારિધૌ ॥ ૭૧॥

સર્વાભીષ્ટફલપ્રદાનચતુરે શાખાભિરુદ્ભાસિતે
સ્નિગ્ધશ્રીકરપલ્લવારુણશુભસ્કન્ધોજ્જ્વલે શ્યામલે ।
મધ્યસ્થા હરિચન્દને વિલસતી શ્રીકલ્પવલ્લી શ્રિતા-
નસ્માઁલ્લોચનષટ્પદૈઃ કરુણયા સંવીક્ષમાણા સદા ॥ ૭૨॥

કાર્યદ્રવ્યનિદાનકારણતયા જોઘુષ્યમાણે ગુણૈ-
રાશ્લિષ્ટે નિજરૂપસમ્પદુચિતાત્ સત્ત્વાન્મહત્ત્વાત્ સતામ્ ।
પ્રત્યક્ષે નિરપાયસઙ્ગમુચિતં પ્રાપ્તા પરા જાતિવત્
દ્રવ્યેઽસ્માકમુપેયુષાં નયનભૂર્ભૂયાત્ સદા સેન્દિરા ॥ ૭૩॥

વિદ્વદ્ભિઃ પુરુષાર્થસાધનતયા સમ્પ્રાર્થ્યમાને ગુણૈ-

રઙ્ગૈઃ કર્મભિરુજ્જ્વલે ઘનરુચા રૂપશ્રિયા રાજિતે ।
ક(શ)સ્તે સ્તોત્રમુખૈઃ પ્રકાશમતુલં સમ્પ્રાપિતે દક્ષિણાં
વિષ્ણાવધ્વરદક્ષિણેવ કમલા સંરાજતેઽસ્માદૃશામ્ ॥ ૭૪॥

ધાતુર્વ્યાપ્તચિરન્તનપ્રકૃતિસંસ્થાનશ્રિતે સાધુતા-
શાલિન્યન્તકૃદાદિશિક્ષણયુતે વિદ્વદ્ભિરત્યાદૃતે ।
શાબ્દબ્રહ્મણિ દુર્વિવેચનતયા નિત્યાનુબન્ધં ગતા
શ્રીરાસ્તાં કરુણામયી પ્રકૃતિવજ્જિહ્વાગ્રભાગેષુ નઃ ॥ ૭૫॥

પઙ્કચ્છેદિનિ પાલિતત્રિભુવને પઙ્કેરુહશ્રીકરે
પાદસ્પર્શપરાકૃતાખિલતમસ્તોમે પરે બ્રહ્મણિ ।
પાયાદંશુમતિ પ્રભેવ પરમવ્યોમાશ્રયે સંસ્થિતા
પદ્માપાઙ્ગનિરીક્ષણૈઃ પ્રતિકલં પશ્યન્ત્યનન્યાશ્રિતાન્ ॥ ૭૬॥

પદ્માયા મુખમમ્બુજં સુવિમલે નેત્રે ચ નીલોત્પલે
તસ્યાશ્ચિત્તમશોકમબ્જવસતેર્વેણ્યાં સ્થિતા મલ્લિકા ।
ચૂતં પાણિતલં તતઃ સ્મરશરાઃ પઞ્ચાપિ તત્રાસતે
તૈર્નિત્યં પરિમોહિતઃ કિમુ હરિર્નિદ્રાતિ ગેહે ચિરમ્ ॥ ૭૭॥

પદ્માયા મુખમમ્બુજં સુવિમલે તત્રાપિ નીલોત્પલે
નેત્રે તત્ર કનીનિકા મધુકરાઃ સઞ્ચારકાઃ સર્વદા ।
નીલામ્ભોદરુચિર્હરેઃ કલિયુગેષ્વાતન્વિ તેનાન્યથા
શુદ્ધસ્ફાટિકકાન્તિયુક્તતનુતા પ્રૌઢિં ગતસ્ય ધ્રુવમ્ ॥ ૭૮॥

મુક્તાહારવિરાજિતે મણિવરશ્રીસમ્પદોદ્ભાસિતે
લક્ષ્મીલોચનષટ્પદૈરનુકલં પેપીયમાને મુદા ।
શ્રીવત્સાઙ્કિતવક્ષસિ શ્રીતવતામાનન્દસન્દોહને
શ્રીશસ્યાનિશમન્તરઙ્ગમધિકં સક્તં ભવેન્મામકમ્ ॥ ૭૯॥

લક્ષ્મીપાદસરોજયાવકરસસ્પર્શેન મુદ્રાઙ્કિતે
ગોપીતુઙ્ગપયોધરાદરવતો ગોપાલકસ્યાદ્ભુતે ।
મુક્તાહારમયી વિરાજતિ રમાકાન્તસ્ય વક્ષઃસ્થલે
લક્ષ્મીમન્દિરરક્ષિબાહ્યપરિઘા ક્ષીરામ્બુધેઃ કુલ્યકા ॥ ૮૦॥

સૂર્યાટોપદલત્સદાઘનરુચિવ્યાપ્તં સ્ફુરત્તારકં
કાન્તં નિત્યમનન્તમાશ્રિતવતી વિશ્વપ્રિયાધાયિની ।
લક્ષ્મીરિન્દુકલેવ રાજતિ તમસ્સ્તોમચ્છિદાં કુર્વતી

હ્યસ્મન્નેત્રચકોરપારણકરી સત્સઙ્ગ્યચશ્રીકરી ॥ ૮૧॥

રાજ્યાભિષેકસમયે રઘુપુઙ્ગવસ્ય
શક્રેણ સાદરસમર્પિતપદ્મમાલા ।
વક્ષઃસ્થલે વહતિ વારિદમધ્યગામિ-
વિદ્યુત્પ્રભાં કનકરત્નમયી વિચિત્રા ॥ ૮૨॥

લક્ષ્મીમન્દિરમિન્દિરાપ્રણયિનો વક્ષઃસ્થલં રાજતાં
કસ્તૂરીધનસારકુઙ્કુમરજઃપઙ્કૈઃ સદા વાસિતમ્ ।
મુક્તાદામભિરુજ્જ્વલં મણિમયૈઃ સમ્ભૂષિતં ભૂષણૈઃ
અસ્મન્માનસપઙ્કજે હરિધનુશ્ચિત્રં સ્ફુરત્કૌસ્તુભમ્ ॥ ૮૩॥

લક્ષ્મીરિન્દુકલેવ રાજતિ શુભાનન્તસ્ય વક્ષઃસ્થલે
નિત્યં પઙ્કજબાધિની કુવલયાનન્દપ્રદા વારિધૌ ।
જાતા વિષ્ણુપદાશ્રિતા હરશિરઃસંસેવિતા શારદો-
લ્લાસૈઃ સર્વજગત્પ્રમોદનકરી હૃત્પુણ્ડરીકસ્થિતા ॥ ૮૪॥

લક્ષ્મીસ્તુઙ્ગપયોધરાવૃતતલે મુખ્યામૃતાસ્વાદના-
યાનર્ઘૈર્મણિભિર્વિરાજિતતલે મીનાદિભાવોજ્જ્વલે ।
રામાલબ્ધનિજાન્તરે વિલસતી શ્યામેન્દ્રનીલામ્બુધૌ
સઙ્ગં પ્રાપ્તવતી નિરન્તરમિયં મન્માનસાવાસિની ॥ ૮૫॥

પા(પુ)ણ્યા કરાઙ્ઘ્રિકમલેક્ષણતારકાદિ-
નીલોત્પલભ્રમરશોભિતગાત્રવલ્લી ।
લક્ષ્મીર્વિભાતિ તટિનીવ મહીભૃતોઽન્ત-
ર્નાગેન્દ્રવાસરસિકસ્ય રમાપ્રિયસ્ય ॥ ૮૬॥

લક્ષ્મીતુઙ્ગપયોધરાવૃતતલે સત્યશ્રિયોદ્ભાસિતે
નાનાધાતુવિમિશ્રિતે શુભગુહાવાસે હરિક્ષ્માભૃતિ ।
પદ્મા નિર્ઝરિણીવ ભાતિ મકરીચિત્રા મનોહારિણી
સન્મીનાદ્યવતારનિત્યરસિકા હ્યસ્માદૃશાં પાવની ॥ ૮૭॥

રેખાભિસ્તિસૃભિસ્ત્રયીમવધૃતશ્ચોલ્લાસયન્ સીમભિઃ
વર્ણોત્કર્ષવિરાજિતો રિપુગણાન્ સમ્ભીષયન્ સ્વોદ્ભવૈઃ ।
ગમ્ભીરધ્વનિભિર્વિરાજતિ હરેઃ કણ્ઠઃ સદા કમ્બુવત્
મુક્તાહારમયૂખશુક્લિમયુતો મન્માનસામ્ભોરુહે ॥ ૮૮॥

ગ્રીષ્મર્તુસ્ફુરદંશુમત્કરસમશ્રીમન્મણિશ્રેણિકા-
    રોચીરાજિવિરાજિતાઙ્ગદલસદ્બાહૂદારલઙ્કૃતઃ ।
તદ્ભોગાચિતહેમરત્નકટકશ્રીમત્કરામ્ભોરુહઃ
    પાયાન્નઃ પરમઃ પુમાન્ કરુણયા સંવીક્ષમાણઃ સદા ॥ ૮૯॥

ચત્વારો ભુજગા ઇવાસુરરિપોર્વિષ્ણોરરાજન્ ભુજાઃ
    તદ્ભોગા ઇવ સુન્દરા મુરરિપોસ્તેષામરાજન્ કરાઃ ।
તદ્ભોગસ્થિતરત્નવત્કરરુહા રાજન્તિ રત્નશ્રિયા
    તદ્ભાસેવ કરા વિરેજુરનિશં રક્તોત્પલશ્રીમુષઃ ॥ ૯૦॥

ભાસ્વત્કોટિનિરાસકારિકિરણસ્તોમેન સર્વં જગત્
    કુવર્ણિં ભયહીનમુજ્જ્વલશિખાજાલૈઃ સુરદ્વેષિણામ્ ।
ભાસ્વદ્રત્નકિરીટકુણ્ડલલસચ્છીર્ષચ્છિદાકારણં
    ચક્રજ્યોતિરુપાસ્મહે મધુરિપોર્વામાન્યહસ્તાશ્રયમ્ ॥ ૯૧॥

વૈરિઞ્ચપ્રલયાનલપ્રતિભટં ભાસ્વત્પરાર્ધપ્રભં
    કૃત્યાભેદવિનાશિ ખણ્ડપરશોઃ કાશીપુરપ્લોષણમ્ ।
સર્વિક્સઙ્ઘસુદક્ષિણપ્રશમનં ચૈદ્યાદિનિર્વાપણં
    ચક્રં જ્યોતિરુપાસ્મહે નિરુપમં વિષ્ણોઃ કરશ્રીકરમ્ ॥ ૯૨॥

સૂર્યેન્દ્રાગ્નિયમાનિલાદિભયદજ્વાલાસહસ્રાવૃતં
    કૃત્યાપ્રેષણદુર્નયેન કુપિતં દુર્વાસસઃ પાર્થિવમ્ ।
કલ્પાન્તાનલભીષણં મુનિવરપ્રાણાપહારોત્સુકં
    કાન્તં સ્તોત્રગણૈર્મહીભૃદુદિતૈશ્ચક્રં મહઃ પાતુ નઃ ॥ ૯૩॥

એતત્કિં મહ એવ નાધિકરણં ષટ્કોણસંસ્થાકૃતે-
    યદ્યેતન્મહસો નિદાનમપરં જ્વાલાઃ કુતઃ સર્વગાઃ ।
ધારાસ્તા ઇતિ ચેન્ન ભેદધિષણાભાવાન્મહશ્ચક્રયોઃ
    ભેદો વા કિમભેદ એવ ન વયં જાનીમહે તત્ત્વતઃ ॥ ૧૪॥

જ્વાલાકેસરભાસિમધ્યનિવસત્ષદ્કોટિસિંહાસન-
    શ્રીમત્કોશવિરાજિતં હરિકરસ્પર્શાદ્વિકાસં ગતમ્ ।
નિત્યં મામકમાનસે વિલસતાચ્ચક્રાબ્જમન્તસ્તમ-
    સ્તોમચ્છેદિસહસ્રરશ્મિવિલસદ્ભાસ્વત્પરાર્ધપ્રભમ્ ॥ ૯૫॥

રૂપં યસ્ય શશિપ્રભં શ્રુતિમયો યસ્મિન્ રસઃ સર્વદા
    યત્પાનાદવનીભૃદુત્તમપદં દુષ્પ્રાપમાપદ્ધ્રુવઃ ।

શબ્દો યસ્ય સુરારિમુખ્યહૃદયે શોકપ્રદઃ સર્વદા
 સોઽસ્તુ શ્રીધરવામહસ્તનિલયઃ શઙ્ખઃ સ્ફુરન્માનસે ॥ ૯૬॥

યન્નિર્હ્રાદવિદારિતાઃ સુરરિપુપ્રાકારદુર્ગાદયો
 યન્નિર્હ્રાદવિભીષિતા દશ દિશો વિદ્રાવિતાઃ શત્રવઃ ।
યન્નિધ્યાનવિનિર્મલીકૃતધિયઃ સન્તઃ સમુત્તારિતાઃ
 સોઽસ્મન્માનસપઙ્કજે વિલસતુ શ્રીશઙ્ખરાજઃ સદા ॥ ૯૭॥

કૌમોદક્યનિશં વિભાતુ હૃદયે વૈકુણ્ઠપાણિગ્રહા
 રત્નોદ્ભાસિસુવર્ણવિગ્રહવતી સન્મેરુસારાસ્પદમ્ ।
સમ્પિષ્ટાસુરવૃન્દમાંસરુધિરશ્લક્ષ્ણાઙ્ગરાગાન્વિતા
 નિત્યં વીરરસોત્સુકાશ્રિતજનશ્રેયોઽભિવૃદ્ધિપ્રદા ॥ ૯૮॥

દેવારાતિકઠોરકણ્ઠનિકષગ્રાવચ્છિદોલ્લેખનાત્
 તૈક્ષ્ણ્યં પ્રાપ્તમતીવ કેશવકટિશ્રીકારણં નન્દકમ્ ।
નીલં વર્ણમિવાશ્રયાદુપગતં વહ્નિં વિહાયસ્થિતં
 ધૂમસ્તોમમિવાશ્રયેઽહમનિશં પાપાદ્રિભેદક્ષમમ્ ॥ ૯૯॥

જ્યાનિસ્વાનવિદીર્ણવૈરિહૃદયપ્રાણોરગોત્સારણ-
 પ્રાદુર્ભૂતપરાક્રમાર્જિતયશોવ્યાપ્તાખિલાશાન્તિમમ્ ।
ભાસ્વદ્રશ્મિસમાનબાણનિકરોચ્છુષ્મીકૃતારિપ્રભા-
 નીરં કાર્મુકમાશ્રયેઽહમનિશં વિષ્ણોઃ કરશ્રીકરમ્ ॥ ૧૦૦॥

ચક્રં દક્ષિણપાણિપઙ્કજદલે સૂર્યાયમાણં વહન્
 શઙ્ખં વામકરામ્બુજે કૃતરુચિં હંસાયમાનં વહન્ ।
ભૃઙ્ગાવલ્યુપમં કરામ્બુજતલે ખડ્ગં પરે સંવહન્
 વિષ્ણૂ રાજતિ વારિતાખિલરિપુર્હસ્તાન્તરે સદ્ગદામ્ ॥ ૧૦૧॥

સૌરભ્યરક્તિમમૃદુત્વસમઞ્ચિતસ્ય
 વિષ્ણો તવાધરદલસ્ય મનોજ્ઞરૂપાઃ ।
એકદ્વિયોગસહિતા મધુકૈટભારે
 બિમ્બપ્રવાલવિટપા ન સમા ભવન્તિ ॥ ૧૦૨॥

મુક્તા મુખામ્ભોજનિવાસમેત્ય
 દન્તચ્છલાત્તે દનુજેન્દ્રશત્રો ।
મુક્તા બભૂવુર્જલજન્મવત્ત્વેઽ
 પ્યહો મહીયાન્ ગુણસન્નિકર્ષઃ ॥ ૧૦૩॥

મન્દસ્મિતં મધુરિપોર્મુખચન્દ્રબિમ્બે
જ્યોત્સ્નાયતે જિતનિશાચરબાલકસ્ય ।
કરતૂરિકાતિલકમેતિ કલઙ્કશોભાં
લીલાવશેન વિધૃતં રુચિરે લલાટે ॥ ૧૦૪॥

કન્દર્પઃ કમલાપતેર્મુખરથં દન્તાધરામ્ભોજસ-
ન્મુક્તાવિદ્રુમભૂષિતં ત્રિજગતાં સમ્મોહના યદ્ધ્રુવમ્ ।
નાસાભ્રૂ યુગવીક્ષણાદિશરધીષ્વાસેષુમુખ્યાયુધૈઃ
સજ્જંહ્યાતનુતે તતો હિ મુનયસ્તદ્ ધ્યાનિનો મોહિતાઃ ॥ ૧૦૫॥

આકર્ણાન્તવિશાલલોચનયુગં પદ્માદરાત્ સંશ્રિતા
ભૃઙ્ગાણામિ મિયમાલિરિત્યકુરુતાં બુદ્ધિં જનાનાં ભ્રુવૌ ।
વેતણ્ડાચલવાસિનો મધુરિપોર્યત્રાસને તત્સદા
પશ્યેયં વરદપ્રભોર્મુખમહં રત્નસ્ફુરત્કુણ્ડલમ્ ॥ ૧૦૬॥

સૌન્દર્યામૃતદીર્ઘિકા મુરરિપોઃ કર્ણદ્વયી કુણ્ડલ-
પ્રત્યુપ્તાનઘરત્નકાન્તિનિચયપ્રદ્યોતિગણ્ડસ્થલા ।
નેત્રદ્વન્દ્વવિશાલતાવધિરઘશ્રેણીસમુત્સારિણી
શષ્કુલ્યા સદૃશી વિભાતુ હૃદયે રેખાભિરુદ્ભાસિતા ॥ ૧૦૭॥

વિષ્ણોર્દક્ષિણલોચનં દિનકરો વામં તુ તારાધિપો
લોકાનન્દક ઇત્યલં મુનિગણા વક્તું પ્રવૃત્તા મૃષા ।
દૃગ્રૂપેણ તયોઃ સ્થિતૌ મુરરિપોર્નાસ્તિ પ્રસક્તિઃ પરં
તત્તુલ્યં પ્રતિબિમ્બિતં નયનયોસ્તચ્છઙ્ખચક્રદ્વયમ્ ॥ ૧૦૮॥

કસ્તૂરીતિલકાઙ્કમન્દહસિતજ્યોત્સ્નાનનેન્દું હરે-
રસ્મન્નેત્રચકોરયુગ્મમનિશં પેયાન્મુદા યસ્તમઃ ।
કૌટિલ્યાલયકુન્તલાકૃતિયુતં સદ્રત્નનિર્યત્પ્રભા- ।
જાલોલ્લાસિકિરીટસૂર્યસહિતશ્ચક્રેડન્તરાપીડિતમ્ ॥ ૧૦૯॥

પદ્માનાયકપાદપદ્મયુગલીમાસ્વાદ્ય તજ્જઙ્ઘયોઃ
સ્થિત્વોરુદ્વયમાપ્ય તત્કટિતટીમાશ્રિત્ય તન્નાભિજમ્ ।
પદ્મં પ્રાપ્ય રમાપરિગ્રહમુરઃ પ્રાપ્યાયુધાલઙ્કૃતાન્
હસ્તાનાપ્ય મુખાબ્જતન્મકુટયોર્મન્માનસં સ્યાદ્ધ્રુવમ્ ॥ ૧૧૦॥

શ્રીમત્કૌશિકવંશવારિનિલયાદાચાર્યરત્નાકરાત્

કૃષ્ણાર્યઃ સમભૂત્ કલાપરિવૃતઃ શીતાંશુના નિર્મિતઃ ।
સૂનુર્વેઙ્કટકૃષ્ણનામસહિતસ્તસ્યાકરોદ્વૈષ્ણવં
શ્રીપાદાદિશિખાવધિસ્તવમિમં મુખ્યં સમૃદ્ધાર્થકમ્ ॥ ૧૧૧॥

॥ ઇતિ શ્રીવરદરાજશતકં સમ્પૂર્ણમ્ ॥

Proofread by Musiri Janakiraman

*Shri Varadaraja Shatakam*
pdf was typeset on July 30, 2021

Please send corrections to *sanskrit@cheerful.com*